# वैयाकरणसिद्धान्तकौमुदी

## अजन्तनपुंसकलिङ्गप्रकरणम् (५)

## १८.०७.२०११

# पुनरावर्तनम्

- इकारान्ताः नपुंसकलिङ्गाः
- वारिशब्दः
- अजादिषु विभक्तिषु 'इकोऽचि विभक्तौ' इति नुमागमः ।
- आङि परत्वात् नाभावः, आमि पूर्वविप्रतिषेधेन नुडागमः ।

- अनादिशब्दः
- भाषितपुंस्कत्वात् तृतीयादिषु पुंवद्भावः ।

- 'अस्थि-दधि-सक्थि-अक्ष्णाम् अनङुदात्तः' ।

# पुनरावर्तनम्

- ईकारान्ताः नपुंसकलिङ्गाः
- 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वः ।

- उकारान्ताः नपुंसकलिङ्गाः
- मधुशब्दः वारिवत् ।
- सानुशब्दस्य वा स्नुः शस्प्रभृतिषु ।
- प्रियक्रोष्टुशब्दे तृज्वद्भावात् पूर्वविप्रतिषेधेन नुम् ।
- भाषितपुंस्कत्वात् पुंवद्भावपक्षे तु 'विभाषा तृतीयादिष्वचि' इति विकल्पेन तृज्वद्भावः ।

# ऊकारान्ताः नपुंसकलिङ्गाः

- ‘ह्रस्वो नपुंसके प्रातिपदिकस्य’ इति ह्रस्वः ।
- सुलु, सुलुनी, सुलूनि ।
- पुनस्तद्वत् ।
- सुल्वा, सुलुना ।
- ‘तृतीयादिषु...’ इति वा पुंवद्भावः ।

# ॠकारान्ताः नपुंसकलिङ्गाः

- धातृ, धातृणी, धातॄणि ।
- हे धातः, हे धातृ ।
- धात्रा/ धातृणा ।
- एवं ज्ञातृ-कर्त्रादयः ।

- ओकारान्तः नपुंसकलिङ्गः ‘प्रद्यो’ शब्दः (प्रकृष्टा द्यौः यस्य तत्) ।
- ‘ह्रस्वो नपुंसके..’ इति ह्रस्वे कर्तव्ये,

# ३२३. एच इग्घ्रस्वादेशे (१.१.४८)

- पदत्रयम् । एचः, इक्, ह्रस्वादेशे ।
- आदिश्यमानेषु ह्रस्वेषु एचः इगेव स्यात् ।

- प्रद्यु, प्रद्युनी, प्रद्यूनि ।
- प्रद्युना इत्यादि ।
- इह न पुंवत्, यद् इगन्तं प्रद्यु इति, तस्य भाषितपुंस्कत्वाभावात् ।
- एवम् अग्रेऽपि ।

# ऐकारान्ताः नपुंसकलिङ्गाः

- प्रै – प्रकृष्टा राः यस्य तत् ।
- ह्रस्वे कृते प्रिर ।
- प्रिर, प्रिरणी, प्रीणि ।
- एकदेशविकृतस्य अनन्यत्वाद् 'रायो हलि' इति आत्वम् ।
- प्राभ्याम्, प्राभिः ।
- 'नुमचिर..' इति नुटि आत्वे प्राणाम् इति माधवः ।
- वस्तुतस्तु संनिपातपरिभाषया नुटि आत्वं न ।
- 'नामि इति दीर्घस्तु आरम्भसामर्थ्यात् संनिपातपरिभाषां बाधत इत्युक्तम् ।
- प्रीणाम् ।

# औकारान्ताः नपुंसकलिङ्गाः

- सुनौ – शोभना नौः यस्य तत् ।
- ह्रस्वे कृते सुनु ।
- सुनु, सुनुनी, सुनूनि ।
- सुनुना ।
- सुनुने, इत्यादि ।